श्रीगणेशायनमः॥श्रीमन्महाराजाधिराजराजराजे
न्श्रीसवाईरामसिंहजीकीआज्ञासेपुस्तकउत्तररा

॥उत्तररामचरितनाटकम्॥



मचरित्रंनाटकंछपवाईमुनशीकिसनसरूपनेसवा
ईजयनगरमैं॥सम्बत्१९०८काज्येष्ठशुक्ल२२·

॥श्रीगणेशायनमः॥उत्तरंरामचरितंनाटकम्॥नान्
न्दी॥इदंकविभ्यःपूर्वेभ्योनमोवाकंप्रशास्महे॥विन्दे
मदेवतांवाचममृतामात्मनःकलां॥१॥नान्द्यन्तेसू
त्रधारः॥अलमतिविस्तरेण॥अद्यखलुभगवतःका
लप्रियनाथस्ययात्रायामार्य्यमिश्रान्विज्ञापयामिः॥ए
वमत्रभवन्तोविदाङ्कुर्वन्तुः॥अस्तिखलुतत्रभवान्
काश्यपःश्रीकण्ठपदलाञ्छनोभवभूतिर्नाम॥यंब्रा
ह्मणमियंदेवीवाग्वश्येवान्ववर्तत॥उत्तरंरामचरितं
तत्प्रणीतंप्रयोक्ष्यते॥१॥एषोऽहंकार्य्यवशादायो ध्य
कस्तदानींतनश्चवैदेशिकःसंवृत्तः॥समन्तादवलो
क्य॥भोभोयदातावदत्रभगवतःपौलस्त्यकुलधूमकेतो
र्महाराजस्यरामस्यायमभिषेकसमयोरात्रिन्दिवमसं
हृतानन्दनान्दीकस्तत्किमद्यविश्रान्तचारणानि च
त्वरस्थानानि॥प्रविश्य॥नटः॥समन्तादवलोक्य॥भा
वप्रेषिताहितेस्वगृहान्महाराजेनलङ्कासमरसुहृदो
महात्मानःप्लवङ्गराक्षसाःसमाजोपस्थायिनो नान
दिगन्तादागताब्रह्मर्षयोराजर्षयश्चयदाराधनायैता
वतोदिवसानुत्सवआसीत्॥सूत्र॥एवमेतत्॥संप्रतिहि
॥वशिष्ठाधिष्ठितादेव्योगताराघवमातरः॥अरुन्धतीं
पुरस्कृत्ययज्ञेजामातुराश्रमं॥२॥नटः॥वैदेशिकोऽस्मी

3

ति॥ नटः॥ कः पुनरसौ जामाता॥ सूत्र॥ कन्यां दशरथो
राजा शान्तां नाम व्यजीजनत्॥ अपत्यकृतिकां राज्ञे लोम
पादाय यां ददौ॥ १॥ विभाण्डकसुतस्तामृष्यशृङ्ग उपये
मे। तेन च सांप्रतं द्वादशवार्षिकं सत्रमारब्धं। तदनुरोधा
त् कठोरगर्भामपि वधूं जानकीं विमुच्य। गुरुजनस्तत्र ग
त इति॥ सूत्र॥ तत्किमनेन। नटैर्हि राजद्वारमेव स्वजातिस
मयेनोपतिष्ठावः। नटः। तेन हि निरूपयतु राज्ञः सुपरि
शुद्धमुपस्थानस्तोत्रपद्धतिं भावः। सूत्र। मारिष॥ सर्व
था व्यवहर्तव्यं कुतो ह्यवचनीयता॥ यथा स्त्रीणां तथा
वाचां साधुत्वे दुर्जनो जनः॥ १॥ नटः। अतिदुर्जन इति वक्त
व्यं॥ देव्यामपि हि वैदेह्यां सापवादो यतो जनः॥ रक्षोगृ
हस्थितिर्मूलमग्निशुद्धौ त्वनिश्चयः॥ २॥ सूत्र॥ यदि पु
नरियं किंवदन्ती महाराजं प्रति स्यन्देत ततः कष्टं स्या
त्। नटः। सर्वथा ऋषयो देवताश्च श्रेयो विधास्यन्ति इ
ति॥ परिक्रम्य॥ भो भोः क्वेदानीं महाराजः॥ आकर्ण्य
॥ एवं जनाः कथयन्ति॥ स्नेहात्सभाजयितुमेत्य दिना
न्यमूनि नीतोत्सवेन जनकोऽद्य गतो विदेहान्॥ देव्या
स्ततो विमनसः परिसान्त्वनाय धर्मासनाद्विशति वा
सगृहं नरेन्द्रः॥ ३॥ इति निष्क्रान्तौ॥ प्रस्तावना॥ ततः
प्रविशत्यासनोपविष्टो रामः सीता च॥ रामः॥ देवि वि

वेदेहिसमाश्वसिहि२।तएवगुरवोनशक्नुवन्त्यस्मान्वि
योक्तुं।किन्त्वनुष्ठाननित्यत्वात्स्वातन्त्र्यमपकर्षेति॥स१
ङ्कटास्साहिताग्नीनांप्रत्यवायैर्गृहस्थता॥१॥सीता।जा
णामिअज्जउत्तजाणामि किन्तुसन्दावआरिणोवन्धु१
जणविप्पओआहोन्ति।(१)रामः।एवमेतत्एवमेवं
हिहृदयमर्म्मच्छिदःखल्वमीसंसारभावाःयेभ्योबीभत्स
मानाःसंत्यज्यसर्वान्कामानरण्येमनीषिणोविश्राम्य१
न्ति॥प्रविश्यकञ्चुकी।रामभद्रइत्यर्द्धोक्ते॥साशङ्कं।
भोमहाराज।रामः॥सस्मितं॥आर्य्यननुरामभद्रइत्येव
मांप्रत्युपचारःशोभतेतातपरिजनस्य तद्यथाभ्यस्तमुच्य
तां।कञ्चुकी।ऋष्यशृङ्गाश्रमादष्टावक्रःप्राप्तः।सीता।
अज्जतदोकिंविलम्बीअदि।२)कञ्चुकी।निष्क्रान्तः
।प्रविश्य।।अष्टावक्रः।स्वस्तिवां।रामः।आर्य्यअभिवा
दयेइतआस्यतां।सीता।णमोणमोदेअविकुसलंसम१
गास्समममगुरुजणस्सअज्जाएसंताए।(३)

---

(१)जानाम्यार्य्यपुत्रजानामि किन्तुसन्तापकारिणो
वन्धुजनविप्रयोगाभवन्ति। (२)ततःकिंविलम्ब्य
ते। (३)नमोनमस्तेऽपिकुशलंसमग्रस्यममगुरुज
नस्यार्य्यायाःशान्तायाः॥

रामः। निर्विघ्नः सोमपीथी आवुत्तो मे भगवानृष्यशृङ्गः
आर्य्या च शान्तेति। सीता। अस्मान्वा स्मरति। (१) अष्टा
॥ उपविश्य॥ अथ किं देवि भगवान्वशिष्ठस्त्वामिदमाह।
विश्वम्भरा भगवती भवतीमसूत राजा प्रजापतिसमो
जनकः पिता ते। तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां
येषां गृहेषु सविता च गुरुर्वयञ्च॥१॥ तत्किमन्यदाशास्महे
केवलं वीरप्रसवा भूयाः। रामः। अनुगृहीतोऽस्मि।
लौकिकानां हि साधूनामर्थं वागनुवर्त्तते॥ ऋषीणां पु
नराद्यानां वाचमर्थोऽनुधावति।२। अष्टा। इदं भगवत्या
अरुन्धत्या देवीभिः शान्तया च भूयो भूयः संदिष्टं यः क
श्चिद्गर्भदोहदो भवत्यस्याः सोऽवश्यमचिरात्संपाद
यितव्यः। रामः। क्रियते यदेषा कथयति। अष्टा। नना
न्दुः पत्या चादिष्टमृष्यशृङ्गेण वत्से कठोरगर्भेति।
नानीतासि वत्सोऽपि रामभद्रस्त्वद्विनोदार्थमेव स्थापि
तः तत्पुत्रपूर्णोत्सङ्गामायुष्मतीं द्रक्ष्यामि। रामः॥ सहर्ष
स्मितं॥ तथास्तु आर्य्य भगवता वशिष्ठेन पुनः किञ्चि
दादिष्टोऽस्मि। अष्टा। श्रूयतां। जामातृयज्ञेन वयं निरु
द्धास्त्वं बाल एवासि नवञ्च राज्यं युक्तः प्रजानामनुरञ्ज
ने स्यास्तस्माद्यशो यत्परमं धनं वः॥३॥

(१) अस्मान्वा स्मरति।

रामः।यथाहभगवान्मैत्रावरुणिः।स्नेहंदयाञ्चसौख्य।
ञ्चयदिवाजानकीमपि।आराधनायलोकानांमुञ्चतो
नास्तिमेव्यथा।१।सीता।अदोज्जेवराहवउलधुरन्धरो
अज्जउत्तो।(१)रामः।कःकोऽत्रभो।विश्राम्यतामष्टाव।
क्रः।अष्टा।उत्थायपरिक्रम्यच।अयेकुमारलक्ष्मणः
प्राप्तः।इतिनिष्क्रान्तः।प्रविश्य।लक्ष्मणः।जयतिजय
तिआर्य्यः।आर्य्यतेनचित्रकारेणास्मदुपदिष्टमस्यांवी
थ्यामार्य्यचरितमभिलिखितं तत्पश्यत्वार्य्यः।रामः।।
जानासिवत्सदुर्मनायमानांदेवींविनोदयितुंतत्किय
न्तमवधिंयावत्।लक्ष्म।यावदार्य्यायाहुताशनेविशुद्धिः
रामः।शान्तं।उत्पत्तिपरिपूतायाःकिमस्याःपावनान्तरैः
।तीर्थोदकञ्चवह्निश्चनान्यतःशुद्धिमर्हतः।४।लक्ष्म।।
देविदेवयजनसम्भवेसीतेप्रसीदएषतेजीवितावधिः
प्रवादः।रामः।कष्टोजनःकुलधनैरनुरञ्जनीय स्तन्मे
दुरुक्तमशिवंनहितत्क्षमंते।नैसर्गिकीसुरभिणः।
कुसुमस्यसिद्धामूर्द्धिस्थितिर्नचरणैरवताडनानि।५।
सीता।भोदुअज्जउत्तभोदुएहिपेक्खह्मदावदेचरिदं(२)

(१)।अतएवराघवकुलधुरन्धरआर्य्यपुत्रः।(२)।भ
वतुआर्य्यपुत्रभवतुएहिप्रेक्षावहेतावत्तेचरितं। ॥

इत्युत्थाय परिक्रामन्ति॥ लक्ष्म। इदं तावदालेख्यं। सीता।
निर्वर्ण्य॥ केदाणिं एदे उवरि णिरन्तरट्ठिदा उवत्थुवन्ति
विअ अज्जउत्तं (१) लक्ष्म। देवि एतानि सरहस्यजृम्भक
ास्त्राणि यानि भगवतः कृशाश्वात् कौशिकमृषिं विश्वामित्र
मित्रं विश्वामित्रमुपसंक्रान्तानि तेन च ताडकावधे प्रसा
दीकृतान्यार्यस्य। रामः। वन्दस्व देवि दिव्यास्त्राणि। ब्रह्मा
दयो ब्रह्महिताय तप्त्वा परःसहस्राः शरदस्तपांसि॥ एता
न्यपश्यन् गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि। १
सीता। णमो णमो एदाणम्। (२) रामः। सर्वथेदानीं त्वत्प्र
सूतिमुपस्थास्यन्ति। सीता। अणुग्गहीदह्मि। (३) लक्ष्म।
एष मिथिलावृत्तान्तः। सीता। अम्महे दलन्तणवणीलुप्पल
सामलसिणिद्धमसिणसोहमाणमंसलेण देहसोहग्गेण
विह्मअत्थिमिदताददीसन्तसुन्दरसिरी अणादरखु
डिदसङ्करसरासणो सिहण्डमुद्धमुहमण्डलो अज्जउत्तो आ
लिहिदो। (४)

---

(१) केइदानीमेते उपरि निरन्तरस्थिता उपस्तुवन्तीवार्यपुत्रं।
(२) नमो नम एतेभ्यः। (३) अनुगृहीतास्मि। (४) दलन्नवनीलो
त्पलश्यामलस्निग्धमसृणशोभमानमांसलेन देहसौभाग्येन वि
स्मयस्तिमिततातदृश्यमानसुन्दरश्रीरनादरखण्डितशङ्करश
रासनः शिखण्डमुग्धमुखमण्डल आर्यपुत्र आलिखितः॥

न स्म। आर्य्ये पञ्च पञ्च संबन्धिनो वशिष्ठादीन् एतान् लक्ष
यति॥ गौतमश्च शतानन्दो जनकानां पुरोहितः॥१॥ रामः।
इष्टमेतत्। जनकानां रघूणाञ्च सम्बन्धः कस्य न प्रियः॥
यत्र दाता गृहीता च स्वयं कुशिकनन्दनः॥२॥ सीता। एदे क्
खु तक्काल किदगोदाणमङ्गलाव तारो भादरो विस्साह
दीक्खिदा तुह्मे आएणमित स्सिंज्जेव पदेसे। तस्सिंज्जेव का
लेव त्ताम्हि। (१) रामः। समयः स वर्त्तत इवैष यत्र मां समर
नन्दयत् सुमुखि गौतमार्पितः॥ अयमुद्गृहीत कमनी
य कङ्कणस्तव मूर्त्तिमानिव महोत्सवः करः॥३॥ लक्ष्म
। इयमार्य्या इयमप्यार्य्या माण्डवी इयमपि वधूः श्रुतकी
र्त्तिः। सीता। वच्छ इअं पि अवरा का (२) लक्ष्म॥ सलज्ज
स्मितमपवार्य्य॥ अये ऊर्म्मिलां पृच्छत्यार्य्या भवत्वन्य
तः संचरामि॥ प्रकाशं॥ आर्य्ये द्रष्टव्यमेतत्। अ
यञ्च भगवान् भार्गवः। सीता। सीदह्मि। (३) रामः। ऋषे
नमस्ते। लक्ष्म। आर्य्ये पश्य पश्य अयमसावार्य्येण॥ इ
त्यर्द्धोक्ते। रामः॥ साक्षेपं॥ अयि वत्स तरं द्रष्टव्यमन्यतो।

(१) एते खलु तत्कालकृतगोदानमङ्गला श्चत्वारो भ्रात
रो विवाहदीक्षिता यूयं ज्ञाना मित स्मिन्नेव प्रदेशे तस्मिन्ने
व काले वर्त्ते। (२) वत्स इयमपि अपरा का। (३) भीतास्मि॥

दर्शय। सीता॥ सस्नेहबहुमानं निर्वर्ण्य। सुट्ठु सोहसि
अज्जउत्त एदिणा विणअमाहप्पेण (१) लक्ष्मणः। एते वयम्।
अयोध्यां प्राप्ताः। रामः। सास्रम्। स्मरामि हन्त स्मरामि। जीव
त्सु तातपादेषु नवे दारपरिग्रहे। मातृभिश्चिन्त्यमानानां
ते हि नो दिवसा गताः।१। इयमपि तदा जानकी। प्रतनु
विरलैः प्रान्तोन्मीलन्मनोहरकुन्तलैर्दशनमुकुलै
र्मुग्धालोकं शिशुर्दधती मुखम्॥ ललितललितैर्ज्यो
त्स्नाप्रायैरकृत्रिमविभ्रमैरकृत मधुरैरम्बानां मे कु
तूहलमङ्गकैः।२। लक्ष्मणः। एषा मन्थरा। रामः। अन्य
तो गत्वा। देवि वैदेहि। इङ्गुदीपादपः सोऽयं शृ
ङ्गवेरपुरे पुरा। निषादपतिना यत्र स्निग्धेनासीत्समा
गमः।३। विहस्य स्वगतम्। अये मध्यमाम्बावृत्तान्तमन्त
रितमार्येण। सीता। अह्मो एसो जटासंजमणवुत्तन्तो
(२) लक्ष्मणः। पुत्रसंक्रान्तलक्ष्मीकैर्यद्वृद्धेक्ष्वाकुभिः कृ
तम्। धृतं बाल्ये तदार्येण पुण्यमारण्यकं व्रतम्। सीता।
एसा पसण्णपुण्णसलिला भअवदी भाईरथी (३) रामः।
रघुकुलदेवते नमस्ते। तुरगविचयव्यग्रानुर्वी।

---

(१) सुष्ठु शोभसे आर्यपुत्र एतेन विनयमाहात्म्येन।
(२) अहो एष जटासंयमनवृत्तान्तः। (३) एषा प्रसन्नपु
ण्यसलिला भगवती भागीरथी॥

भिदःसगराध्वरेकपिलमहसामर्षात्प्रदग्धान्पितुः
श्वपितामहान्। अगणितसमुत्तापंतप्त्वातपांसि भगी
रथोभगवतितयस्पृष्टानद्भिश्चिराद्ददीधरत्॥१॥
साध्वमम्बस्नुषापामरुन्धतीवसीतायांशिवानुध्या
नपराभवालक्ष्मी। अयमसौनरराजावेदितश्चित्रकू
टयायिनिवर्त्मनिवनस्पतिःकालिन्दीतटवटःश्या
मोनाम। सीता। सुमरेदिएदंपदेसंअज्जउत्तो(१)रामः
अभिकथंविस्मर्य्यते। अलससुलितमुग्धान्यध्वसं
जातखेदाद्शिथिलपरिरम्भैर्दत्तसंवाहनानि। परि
मृदितमृणालीदुर्बलान्यङ्गकानित्वमुरसिममकृ
त्वायत्रनिद्रामवाप्ता॥२॥ लक्ष्मण। एषविन्ध्याटवीमुखे
विराधसंरोधः। सीता। अलंदावएदिणापेक्खामिदा
वअज्जउत्तहत्थधरिदतालवेण्टादवत्तंअत्तणोदक्खि
णारण्णप्पवेसारम्भं(२)रामः। एतानितानिगिरिनि
र्झरिणीतटेषुवैखानसाश्रिततरूणितपोवनानि। ये
ष्वातिथेयपरमाःशमिनोभजन्तेनीवारमुष्टिपचना
गृहिणोगृहाणि॥३॥

(१) स्मरत्येनंप्रदेशमार्य्यपुत्रः। (२) अलन्तावदेते।
नप्रेक्षेतावदार्य्यपुत्रहस्तधृततालवृन्तातपत्रमात्म
नोदक्षिणारण्यप्रवेशारम्भं॥ ॥

लक्ष्म। अयं अविरलानोकहनिवहनिरन्तरस्निग्धनी
लपरिसरारण्यपरिणद्धगोदावरीमुखरकन्दरः सततम
भिष्यन्दमानमेघमेदुरितनीलिमाजनस्थानमध्यगोगि
रिःप्रस्रवणः। रामः। स्मरसि सुतनु तस्मिन्पर्वते लक्ष्मणे
न प्रतिविहितसपर्यासुस्थयोस्तान्यहानि॥ स्मरसिस
रसनीरांतत्रगोदावरीवास्मरसिचतदुपान्तेष्वावयोर्व
र्तनानि॥ २॥ अपिच। किमपिकिमपिमन्दंमन्दमासत्ति
योगादविरलितकपोलंजल्पतोरक्रमेण॥ सपुलकप
रिरम्भव्यापृतैकैकदोष्णोरविदितगतयामारात्रिरेव
व्यरंसीत्। ३। लक्ष्म। एषापञ्चवट्यांशूर्पणखा। सीता।
हाअज्जउत्तएत्तिअंज्जेवदंसणम्। (१) रामः। अयिवि
प्रयोगत्रस्तेचित्रमेतत्। सीता। जधातधाभोदुदुज्ज
णोअसुहंउप्पादेदि। (२) रामः। हन्तवर्तमानइवजन
स्थानवृत्तान्तःप्रतिभाति। लक्ष्म। अथेदंरक्षोभिःकनक
हरिणच्छद्मविधिनातथावृत्तंपापैर्व्यथयतियथाक्षालि
तमपि॥ जनस्थानेशून्येविकलकरणैरार्यचरितैरपि
ग्रावारोदित्यपिदलतिवज्रस्यहृदयं। ४। सीता॥ मारतम

(१) हा आर्यपुत्र एतावदेव दर्शनं।

(२) यथा तथा भवतु दुर्जनोऽसुखमुत्पादयति।

मगतम्॥ अइदेवरऋउलाणन्दएवंममकारणादोकिलि
दोसि।(१) लक्ष्म॥ रामं निर्वर्णयसा कृतं॥ आर्य्य किमेतत्
। अयंते वाष्पौघस्त्रुटितइवमुक्तामणिसरो विसर्पन्नधा
रानिर्लुठति भरणीजर्जरकणः॥ निरुद्धोऽप्यावेगः स्फुर
दधरनासापुटतया परेषामुन्नेयो भवति च भराध्मातहृ
दयः। राम:। वत्स॥ तत्कालप्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवाञ्छया विसोढः॥ दुःखाग्निर्मन
सि पुनर्विपच्यमानो हृन्मर्मव्रण इव वेदनां करोति।१
सीता। हद्धी हद्धी अहंवि अदिन्तमिदं देवरएणरणण
अज्जउत्तसुण्णं विअ अत्ताणं पेक्खामि।(२) लक्ष्म॥ ख
गतं॥ भवत्वन्यतः क्षिपामि॥ चित्रं विलोक्य प्रकारं॥ त
देतन्मन्वन्तरपुराणस्य भराजस्य तत्रभवतस्तातजटायु
षश्चरित्रविक्रमोदाहरणं। सीता। दानाद णित्तुडो देष्म
क्खसिणोहो।(३) राम:। हा तात काश्यप शकुन्तराजक
पुनस्त्वादृशस्य महतस्तीर्थस्य साधोः सम्भवः। लक्ष्म। भ

(१) अपि देवरघुकुलानन्द एवं मम कारणात् क्लिष्टो
ऽसि। (२) हा धिक् हा धिक् अहमपि अतिनृशंसा
सेमरणारणकेन आर्य्यपुत्रशून्यमिवात्मानं प्रेक्षे।
(३) हा तात निर्व्यूढस्ते अपत्यस्नेहः।

पमसोजनस्थानपश्चिमश्चित्रकुञ्जवान्नामदनुकव
न्धाधिष्ठितो दण्डकारण्यभूभागः तदिदमप्यमूकपर्वतस्य
नकूःस्पाममपरं इयम्ब्रम्नवसानामसिद्धवरीनदेतसम्पा
भिधानं सरः सीता। एत्थ किल अज्जउत्तेण विच्छड्डिदाम
रिसधीरत्तणं प्पमुक्तकण्ठं रुदिग्धं आसि। (१) रामः। देवि
रमणीयमेतत्पम्पासरः। एतस्मिन्मदकलमल्लिकाख्य
पक्षव्याधूतस्फुरदुरुदण्डपुण्डरीकाः। बाष्पाम्भः परिपत
तोऽन्तरालेसंदृष्टाः कुवलयिनो भुवो विभागाः। एत्थ
त्था। अपमार्थ्यो हनूमान् सीता। हमो सो चिरणिविलजीव
अतो अपच्चुवकरणगुरुओ उवआरी महाभाओ मारुदी (२)
रामः। दिष्ट्यासोऽयं महाबाहुरञ्जनानन्दवर्धनः। यस्य वी
र्येण कृतिनो वयमत्र भुवनानि च। (३) सीता। पवच्छ एस कुसुमि
दकदंबतरुतलणिविट्ठवरहिणो किंणामधेयो गिरी जस्स अ
णुभावसोहग्गा मेत्तपरिसेसधूसरसिरीमुञ्छतं मुह
लोतुएपरलेणअवलमिदोतरुअलेअज्जउत्तो आलि

(१) अत्र किलार्यपुत्रेण विच्छर्दितामर्षधीरत्वं प्रमुक्तकण्ठं
रुदितमासीत् (२) एष स चिरनिर्भिन्नजीवलोकमप्रत्युपकर
णगुरुकोपकारी महाभागो मारुतिः (३) वत्स एष कुसु
मितकदम्बतरुताण्डवितबर्हिणः किन्नामधेयो गि
रिः यत्रानुभावसौभाग्यमात्रपरिशेषधूसरश्रीर्मूर्छ

हिदो(२)लक्ष्म।सोऽयंशैलःककुभसुरभिर्मील्यवा
न्नामयस्मिन्नीलस्निग्धःश्रयतिशिखरंनूतनस्तोयवा
हः।रामः।वत्सैतस्माद्विरमविरमाऽतःपरंनत्तमोऽस्मि।
प्रत्यावृत्तःपुनरपिसमेजानकीविप्रयोगः।१।लक्ष्म।अ
तःपरमार्य्यस्यतत्रभवतांकपिराक्षसानामसंख्याता।
न्युत्तरोत्तराणिकर्म्माश्चर्य्याणिपरिश्रान्ताचेयमार्य्या।
तद्विज्ञापयामिविश्राम्यतामिति।सीता।अज्जउत्तएदि
णाचित्तदंसणेणपच्चुप्पण्णदोहदाएअत्थिमेविण्णप्पं।
(१)रामः।नन्वाज्ञापय।सीता।जाणेपुणोविपसण्णग।
म्भीरासुवणराजिसुविहरिस्संपवित्तसोम्मसिसिराव
गाहंचभअवदींभाईरहींअवगाहिस्सं(२)रामः।व
त्सलक्ष्मण।लक्ष्मणःएषोऽस्मि।रामः।अचिरंसंपादनीयोदो
हदइतिसंप्रत्येवगुरुभिरादिष्टंतदस्खलितसुखसंपातं
रथमुपस्थापय।सीता।अज्जउत्ततुह्मेहिंपितहिंगंतव्वं(१)

तैर्मूर्च्छन्नूलयाप्ररुदितेनावलम्बितस्तरुतलेआर्य्य।
पुत्रप्रालिखितः(१)आर्य्यपुत्रैतेनचित्रदर्शनेनप्रत्यु
त्पन्नदोहदायाअस्तिमेविज्ञाप्यं।(२)जानामिपुनरपि
पिप्रसन्नगम्भीरासुवनराजिषुविहरिष्यामिपवित्र।
सौम्यशिशिरावगाहाञ्चभगवतींभागीरथीमवगा
हिष्ये।(३)आर्य्यपुत्रयुष्माभिरपितत्रगन्तव्यं।।ः

रामः।अपिकथिनहृदयेएतदपि नन
हि पिच्छेमे।(१)नन्दा।यथाज्ञापयत
न:।रामः।प्रियेहन्तवातायनावर्त
वाव:।सीता।एवंमोउस्रोहरियामि
दाहणिद्वारा।(२)रामः।तेनहिनिरन्त
वातायनाय।जीवमुन्निवसमाश्वस
एतत्प्रतिमाप्ताङ्केरेन्द्रवमयूखचुम्बि
सुरभिनन्द:।१तथाकारयन्सानन्द
द्विजिह्वेतुंनाद्योनमुत्स्मितिवाङ्गस
भावाहितुविषविसर्पः।किमुमदः।।
हिपरिस्ष्टेन्द्रियगणोविकारश्चेतन
नतिष्ठा।२सीता।।विहस्य।।स्थिरप्रेम
किमपरं।(३)रामः।म्लानस्यजीवकु
निमलपंकानिसकलेन्द्रियमोहन
चना।निरलोकहास्याः।कर्णामृता।नि
नि।१सीता।प्रियंवदएहिसंविसंह

मत्तनो। निरूपयति॥ रामः। किमत्वेष्टव्यं। आविवाहसम
यात्गृहे वने शैशवे तदनु यौवने पुनः। स्वापहेतुरनुपाश्रि
तोऽन्यया रामबाहुरुपधानमेष ते। १। सीता॥ निद्रां ना
टयन्ती॥ अत्थि एदं अज्जउत्त अत्थि एदमिति॥ स्वपिति
(१) रामः। कथं प्रियवचनावत्तासि सुप्तैव॥ निर्वर्ण्य स
स्नेहं॥ इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोरसाव
स्याः स्पर्शो वपुषि बहलश्चन्दनरसः॥ अयं कण्ठे बाहु
ः शिशिरमसृणो मौक्तिकसरः किमस्या न प्रेयो यदि प
रमसह्यस्तु विरहः। १। प्रविश्य॥ प्रतीहारी। देव उअत्
त्थिदो (२) रामः। अये कः॥ प्र आसण्णपरिचारओ दुम्मु ती।
हो देवस्स (३) रामः॥ स्वगतं॥ शुद्धान्तचारी दुर्मुखः स
मया पौरजानपदाननुपसर्पितुं प्रयुक्तः॥ प्रकाशं॥ आग
च्छतु॥ प्रतीहारी निष्क्रान्ता॥ प्रविश्य॥ दुर्मुखः॥ स्वगतं
॥ हा कधं सीदादेइं पईदिसं अचिन्तणिज्जं जणाववा
दं देवस्स कधइस्सं अहवा णिओओ क्खु मे ईदिसो मन्द
भाअस्स (४)

---

(१) अस्त्येतत् आर्यपुत्रास्त्येतत्। (२) देव उपस्थितः। (३) आसन्नपरिचारको दुर्मुखो देवस्य। (४) हा कथं सीतादेव्या ईदृशं अचिन्तनीयं जनापवादं देवस्य कथयिष्यामि अथवा नियोगः खलु ईदृशो मन्दभाग्यस्य।

सीता उत्सृज्यते। हा अज्जउत्त सोम्म कहिं सि(१)
रामः। अयि ममैव रणरणकदायिनी खिन्नदर्शना चिर
प्रभावनादेव्याः स्वप्नोद्वेगं करोति। सखेदं परामृशन्।
अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यद्विश्र
ामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः। काले(
नावरणात्ययात्परिणते यत्स्नेहसारे स्थितं भद्रं त
स्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते।२। दुर्मुखः। उ
पसृप्य। जअदु देवो। रामः। ब्रूहि यदुपलब्धं
दुर्मुखः। उवत्थुवन्ति देवं पोरजाणवदा। विसुमारिदा
म्हे महाराअदसरहस्स रामदेवेणत्ति(२) रामः॥
अर्थवाद एषः। दोषं तु किंचित्कथय येन तत्प्रतिविधी
यते। दुर्मुखः। सास्रं। सुणादु देवो(३) कर्णे एवमेव। रामः
अहह। इति मूर्छति। दुर्मुखः। आस्ससदु देवो(४) रामः
आश्वस्य। हा हा धिक् परगृहवासदूषणं यद्वैदेह्याः प्रश
मितमद्भुतैरुपायैः। एतत्तत्पुनरपि दैवदुर्विपाकादल(
र्कं विषमिव सर्वतः प्रसृप्तम्।३। तत्किमत्र मन्दभाग्यः(

(१) हा आर्यपुत्र सौम्य क्वासि (२) उपस्तुवन्ति देवं
पौरजानपदा विस्मारिता वयं महाराजदशरथस्य
रामदेवेण(३) शृणोतु देवः(४) आश्वसितु देवः॥

करोमिविमृश्यसकरुणं।अथवाकिमन्यत्।सताङ्कु
नापिकार्य्येणलोकस्याराधनंव्रतं।यत्पूरितंहितातेनमा
त्रमाणंचमुत्सृता।पसंमत्स्येवभगवतावशिष्ठेनसन्दि
ष्टं।अपिचायत्सावित्रैर्दीपितंभूमिपालैर्लोकश्रेष्ठैः
साधुशुद्धंचरित्रम्।मत्सम्बन्धात्कश्मलाकिंवदन्ती।
स्याचेदस्मिन्हन्तधिङ्मामधन्यं।।हादेविदेवयजनस
म्भवेहास्वजन्मानुग्रहपवित्रितवसुन्धरेहानिमिजन
कवंशनन्दिनिहापावकवशिष्ठारुन्धतीप्रशस्तशी
लशालिनिहाराममयजीवितेहामहारण्यवासप्रिय
सखिहास्तोकप्रियवादिनिकथमेवंविधायास्तवाय
मीदृशःपरिणामः।त्वयाजगन्तिपुण्यानित्वय्यपुण्या
जनोक्तयः।नाथवन्तस्त्वयालोकास्त्वमनाथाविपत्स्य
से।एकुर्मुस्वस्थहिलस्मणंएपतेन्नूतनोराजा।रामः।स्म १
रापयति।कर्णेएवमेवं(कुर्म्म)।कथंदांपत्यं।अग्गिपरिशु
द्धाएगब्भपरिस्फुडिदपवित्तरकुलसंताणएदेवी(दु
ज्जणवअणादोअज्जेणएवंमणाजंववसिदंदेवेण(५)

(५)कथमिदानीमग्निपरिशुद्धायागर्भपरिस्फु(
रितपवित्ररघुकुलसन्तानायादेव्याडुर्जनवच(
नात्त्यागोऽर्य्यणामार्य्यैर्व्यवसितंदेवेन॥ ॥

रामः। हा तात कथं दुर्जनाः पौरजानपदाः। इक्ष्वाकुवंशो
ऽभिमतः प्रजानां जातञ्च दैवाद्वचनीयबीजं॥ तच्चाद्भुतं क
र्म विशुद्धिकाले प्रत्येतु कस्तद्यदि दूरवृत्तं॥३॥ तत्किं क
रोमि। हा देवि॥ इति निष्क्रान्तः॥ रामः। हा कष्टमति
बीभत्सकर्मा नृशंसोऽस्मि संवृत्तः। शैशवात्प्रभृति पो
षितां प्रियैः सौहृदादपृथगाशयां प्रियां॥ छद्मना परिद
दामि मृत्यवे सौनिको गृहशकुन्तिकामिव॥४॥ तत्कि
मस्पृश्यः पातकी देवीं दूषयामि॥ सीतायाः शि
रः स्वैरमुन्नमय्य बाहुमाकर्षयन्॥ अपूर्वकर्मचा
ण्डालमयि मुग्धे विमुञ्च मां श्रितासि चन्दनभ्रान्
त्या दुर्विपाकं विषद्रुमम्॥५॥ उत्थाय॥ हन्त विपर्य
स्तः सम्प्रति जीवलोकः पर्यवसितं जीवितप्रयोजनं
रामस्य शून्यमधुना जीर्णारण्यं जगत्। असारः सं
सारः कष्टप्रायं शरीरं अशरणोऽस्मि किं करोमि काग
तिः अथवा दुःखसंवेदनायैव रामे चैतन्यमाहितं।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं स्थिरैः॥६॥ हा
अम्ब अरुन्धति हा भगवन्तौ विश्वामित्रवशिष्ठौ हा
भगवन्पावक हा देवि भूतधात्रि हा तात जनक हा तात।
हा मातरः हा परमोपकारिन् लङ्काधिपते विभीषण
हा प्रियसखे सुग्रीव हा सौम्य हनूमन् हा सखि त्रिजटे

मुषितास्थपरिभूताःस्थरामहतकेन।अथवाकस्ते।
षामहमिदानीमाह्वाने।तेहिमन्येमहात्मानःकृतघ्नेन
दुरात्मना।।मयागृहीतनामानःस्पृष्टाइवपाप्मना।।
योऽहम्।विस्रम्भादुरसिनिपत्यलब्धनिद्रामुन्मुच्य
प्रियगृहिणींगृहस्यशोभाम्।।आतङ्कस्फुरितकठोरग
र्भगुर्वींक्रव्याद्भ्योबलिमिवनिर्घृणःक्षिपामि।।१।।सीता
याःपादौशिरसिकृत्वा।।देविदेविअयंपश्चिमस्तेराम
स्यशिरसापादपङ्कजस्पर्शःइति।।रोदिति।।नेपथ्ये।।अ
ब्रह्मण्यमब्रह्मण्यम्।रामः।ज्ञायतांभोःकिमेतत्।पुन
र्नेपथ्ये।ऋषीणामुग्रतपसांयमुनातीरवासिनां।।ल
वणत्रासितःस्तोमःशरण्यंत्वामुपस्थितः।।१।।रामः।।
आःकथमद्यापिराक्षसत्रासः।तद्यावदस्यदुरात्मनःकु
म्भीनसीपुत्रस्योन्मूलनायशत्रुघ्नंप्रेषयामि।।कतिचि
त्पदानिगत्वापुनःप्रतिनिवृत्य।।हादेविकथमेवंगता
भविष्यसिभगवतिवसुन्धरेश्लाघ्यांदुहितरमवेक्षस्व
जानकीं।जनकानांरघूणाञ्चयत्कृत्स्नंगोत्रमङ्गलं।।
यांदेवयजनेपुण्येपुण्यशीलामजीजनः।।१।।इतिनिष्
क्रान्तः।।सीता।हासोम्मअज्जउत्तकहिंसि।।सहसो
त्थाय।।हद्धीहद्धीदुस्सिविणअविप्पलद्धाहंअज्जउ
त्तमाक्कन्दामि।हद्धीहद्धीकधंमेआइणिंमंपरिसुत्तंउ

ज्झिअ अज्जउत्तो गदो ता किं दाणिं एदस्सोड्डक्कविस्सं
जइत्तं पेक्खन्ती अत्तणो पहविस्सं। को एत्थ परिस्समो
(१) अविअ पढम्मुद्दिट्ठकुमारलक्खणो विसवेदिसा।
ओरहोमाणहइदेई (२) सीता इमं आरुहह्मि परिस्फुर
दि त्ति अ मे गब्भभारो ता सणिअं गच्छह्म (३) इम्मुभरो
ह्यो देइ। सीता णमो णमो तपोवणाणं णमो णमो र
घुउलदेवदाणं णमो णमो अज्जउत्तचरणकमला
णं णमो णमो सअलगुरुअणाणं (४) ॥ ॥ इति
निष्क्रान्तौ चित्रदर्शनो नाम प्रथमोऽङ्कः। ॥

---

(१) हा सौम्य आर्यपुत्र कुत्रासि हा धिक् दुःस्वप्नेन
विप्रलब्धाहं आर्यपुत्र माक्रन्दामि हा धिक् हा धि
क् कथमेकाकिनीं मां परित्यज्य मामुज्झित्वा आर्यपु
त्रो गतः तत्किमिदानीमेतन्न बलसत्क्षिप्येप
दितं मे तमाणो चात्मनः प्रत्नविष्यामि कोऽत्र परि
जनः (२) देवि कुमारलक्ष्मणो विज्ञापयति सज्जोर
थ आरोहतु देवी (३) इयमारोहामि परिस्फुरती च मे
गर्भभारस्ततः शनैर्गच्छामः (४) नमो नमस्तपोवने
भ्यो नमो नमो रघुकुलदेवताभ्यः नमो नमः आर्यपु
त्रचरणकमलेभ्यो नमो नमः सकलगुरुजनेभ्यः॥

॥अथद्वितीयोऽङ्कः॥

नेपथ्ये।स्वागतंतपोधनायाः॥प्रविश्य।अध्वगवे
षातापसी।अयेवनदेवतेयंफलकुसुमपल्लवार्घे
णमामुपतिष्ठते।प्रविश्य।वनदेवता॥अर्घ्यंवि
कीर्य्य॥यथेच्छंभोग्यंवोवनमिदमयंमेसुदिवसः
सतांसद्भिःसङ्गःकथमपिहिपुण्येनभवति॥त
रुच्छायातोयंयदपितपसोयोग्यमशनंफलं
वामूलंवातदपिनपराधीनमिहवः॥१॥तापसी॥कि
मत्रोच्यते॥प्रियप्रायावृत्तिर्विनयमधुरोवाचिनि
यमःप्रकृत्याकल्याणीमतिरनवगीतःपरिचयः
॥पुरोवापश्चाद्वातदिदमविपर्य्यासितरसंरहस्यं
साधूनामनुपधिविशुद्धंविजयते॥२॥इत्युपवि
ष्टाः।वन।कांपुनरत्रभवतीमवगच्छामि।ताप।
आत्रेय्यस्मि।वन।आत्रेयिकुतःपुनरिहागम्यतेकिं
प्रयोजनोवादण्डकारण्यप्रचारः।आत्रे।अस्मिन्न
गस्त्यप्रमुखाःप्रदेशेभूयांसउद्गीथविदोवसन्ति।ते
भ्योऽधिगन्तुंनिगमान्तविद्यांवाल्मीकिपार्श्वादिहप
र्यटामि।वन।यदातावदन्येऽपिमुनयस्तमेवहि
[illegible]

नोपासतेतल्लोऽस्यस्त्राम्योग्याद्दीर्घप्रवासप्रयासः
।श्रोत्रे।तन्नमहानयमुक्तमन्यूहङ्गनिरुषदीर्घप्रवा।
सोऽ ङ्गीकृतः।वत्त।कीदृशः।श्रोत्रे।तस्यभगवतः
केनापिदेवताविशेषेणसर्वप्रकारास्तुतंस्तन्यपत्या।
गमात्रकेवयसिवर्त्तमानन्दारकद्वयमुपनीतंतत्
स्तत्तुनकेवलमृषीणाःपितुसचराचराणांभूता।
नामान्तरात्मित्वात्तुपस्नेहयति।वत्त।अपितयो।
र्नामसंविज्ञानमस्ति॥श्रोत्रे।तयैवकिलदेवतया
तयोःकुशलवावितिनामनीप्रभावश्चाख्यातः॥
वत्त।कीदृशःप्रभावः॥श्रोत्रे।तयोःसरहस्यजृम्भ।
कास्त्राणांच्याजन्मसिद्धानीति।वत्त।लोश्चित्रमेतत्।
श्रोत्रे।तौचभगवतावाल्मीकिनाधात्रीकर्मवस्तु।
तःपरिगृह्यपोषितौपरिरक्षितौचवृत्तचौडकर्मणौ
श्चतयोस्त्रयीवर्ज्जमितराणास्त्रविद्याःसावधाने।
नपरिनिष्ठापितौसमनन्तरञ्चगर्भैकादशेवर्षेक्षात्रे
णाकल्पेनोपनीयगुरुणात्रयीविद्यामध्यापितौनह्ये
ताभ्यामतिप्रदीप्तमेधाभ्यामस्मदादेःसहाध्यय
नयोगोऽस्ति॥यतः॥वितरतिगुरुःप्राज्ञेविद्यांयथैव
तथाजडेनचखलुतयोर्ज्ञानेशक्तिंकरोत्यपहन्तिवा
।भवतिचपुनर्भूयान्भेदःफलंप्रतितद्यथाप्रभवति

शुचिर्द्विम्बोद्ग्राहेमणिर्नमृदांचयः॥७॥वन।अयमसाव
ध्ययनविघ्नः।आत्रे।अपरश्च।वन।अथापरःकः।आ
त्रे।अथसब्रह्मचारिभिरेकदामध्यंदिनसमयेनदींतमसा
मनुप्रपन्नःतत्रयुग्मचारिणोःक्रौञ्चयोरेकंव्याधेनवि
ध्यमानंशकुन्तमपश्यत् आकस्मिकमत्रभवतोवा
देवीवाचमव्यतिकीर्णवर्णामनुष्टुभेनच्छन्दसापरि
च्छिन्नामभ्युदैरयत्।मानिषाद प्रतिष्ठांत्वमगमः
शाश्वतीःसमाः।यत्क्रौञ्चमिथुनादेकमवधीःका
ममोहितं॥८॥वन।चित्रमाम्नायादन्योनूतनश्छन्द
सामवतारः।आत्रे।तेनखलुपुनःसमयेनतंभग
वन्तमाविर्भूतशब्दब्रह्मप्रकाशमृषिमुपसंक्रम्यभ
गवान्भूतभावनःपद्मयोनिरवोचत्।ऋषेप्रबुद्धो
ऽसिवागात्मनिब्रह्मणि।तद्ब्रूहिरामचरितम्।अव्याह
तज्योतिरार्षंतेप्रातिभंचक्षुः।आद्यःकविरसीत्युक्त्वा
।तत्रैवान्तर्हितः।अथभगवान्प्राचेतसःप्रथमं।
मनुष्येषुशब्दब्रह्मणस्तादृशंविवर्तमितिहासंरा
मायणंप्रणिनाय।वन।हन्ततर्हिमण्डितः
संसारः।आत्रे।तस्मादेवोचन्तदनुरोधान्नस्तत्रहि
महानध्ययनप्रत्यूहइति।वन।युज्यते।आत्रे।वि
श्रान्तास्मिभद्रेसंप्रत्यगस्त्याश्रमस्यपन्थानंब्रूहि।

वनौकसः पञ्चवटीमनुप्रविश्य गम्यतामेतेन गोदा
वरीतीरेण॥ आत्रेयी॥ सवाष्पं॥ अप्येतत्तपोवनं।
प्येषा पञ्चवटी। आगिरिरिह इयं गोदावरी अप्ययं गि
रिः प्रस्रवणः। अपि जनस्थानदेवता वासन्ती त्वं॥
वास। अस्त्येतत्सर्वं। आत्रे। वत्से जानकि। स ए
व ते वल्लभबन्धुवर्गः प्रासङ्गिकीनां विषयः कथानां
॥ त्वां नामशेषामपि दृश्यमानः प्रत्यक्षदृष्टामिव नः
करोति॥ २॥ वास॥ सभयं॥ कथं नामशेषामित्याह।
आर्ये किमत्याहितं सीतादेव्याः॥ आत्रे। न केवलम
त्याहितं सापवादमपि॥ कर्णे एवमेवं॥ वास। अहह।
दारुणो दैवनिर्घात इति॥ मूर्च्छति॥ आत्रे। भद्रे समा
श्वसिहि समाश्वसिहि। वास। हा प्रियसखि हा महाभा
गे ईदृशस्ते निर्माणभागः। हा रामभद्र अथवा
अलं त्वया। आर्ये आत्रेयि अथ तस्मादरण्यात्परि
त्यज्य निवृत्ते लक्ष्मणे सीतादेव्याः किं वृत्तमिति का।
चित्प्रवृत्तिः। आत्रे। नहि नहि। वास। हा कष्टम
रुन्धतीवसिष्ठाधिष्ठितेषु रघुकुलवार्द्धकेषु जीवन्ती
षु महाराज्ञीषु कथमिदं जातं। आत्रे। ऋष्यशृङ्गाश्रमे
गुरुजनस्तदासीत् सम्प्रति परिसमाप्तं तद्द्वादशवार्षि
कं सत्रं ऋष्यशृङ्गेण च संपूज्य विसर्जिता गुरवः। ततो

भगवत्यरुन्धतीनाहंवधूविरहितामयोध्यांगमिष्या
मीत्याह।तदेवराममातृभिरनुमोदितंतदनुरोधाद्भग
वतोवशिष्ठस्यपरिशुद्धाचारोयथावाल्मीकितपो
वनंगत्वातत्रवत्स्यामइति।वास।अथसराजाकिमा
चारःसम्प्रति।आत्रे।तेनराज्ञाक्रतुरश्वमेधःप्रक्रान्तः
वास।अहहधिक्परिणीतमपि।वन।शान्तंशान्तं।
कासौ।कातर्हियज्ञेसहधर्मचारिणी।आत्रे।हिरण्म
यीसीताप्रतिकृतिः।वास।हन्तभोः।वज्रादपिकठो
राणिमृदूनिकुसुमादपि॥लोकोत्तराणांचेतांसि
कोनुविज्ञातुमर्हति॥१॥आत्रे।विसृष्टश्चवामदेवा
नुमन्त्रितोमेध्योऽश्वःउपकल्पिताश्चयथाशास्त्रंत
स्यरक्षितारःतेषामधिष्ठातालक्ष्मणात्मजश्चन्द्रकेतुर
नाप्तदिव्यास्त्रसम्प्रदायश्चसाधनान्वितोऽनुप्रहितः
।वास॥सस्नेहकौतुकास्रं॥कुमारलक्ष्मणस्यापिपुत्रः
हन्तमातर्जीवामिजीवामि।आत्रे।अत्रान्तरेब्राह्म
णेनमृतंपुत्रमारोप्यराजद्वारिसोरस्ताडनमब्रह्मण्य
मुद्घोषितंततोनराजापचारमन्तरेणप्रजानामका
लमृत्युश्चरतीत्यात्मदोषंनिरूपयतिकरुणामये
रामभद्रेसहसैवाशरीरिणीवागुदचरत्।शम्बूको
नामवृषलःपृथिव्यांतप्यतेतपः।शीर्षच्छेद्यःसते

रामस्तंहत्वाजीवमछिन्नं।शूद्रस्तुपश्चात्सैवाकृष्टकृप
णपाणिःपुष्पकंविमानमारुह्यसर्वादिशोविचिन्वन्
त्रस्ततापसान्वेषणायजगत्पतिश्चरितुमारब्धवान्।
वासन्ती।शम्बूकोनामधूमपोऽस्मिन्नेवजनस्थाने
तपश्चरतीतितदपिनामरामभद्रःपुनरपीदंवनमलं
कुर्यात्।आत्रेयी।भद्रेगम्यतेऽधुना।वासन्ती।आर्येआ
त्रेयिएवमस्तुकठोरीभूतस्तुदिवसः।तथाहिकण्डू
लद्विपगण्डपिण्डकषणोत्कम्पेनसम्पातिभिर्घर्म
स्रंसितबन्धनैःस्वकुसुमैरर्चन्तिगोदावरीं॥छायाप
स्किरमाणविष्किरमुखव्याकृष्टकीटत्वचःकूजत्का
न्तकपोतकुक्कुटकुलाःकूलेकुलायद्रुमाः॥१॥इति
निष्क्रान्ते॥विष्कम्भकः॥ततःप्रविशतिसदयोद्यत
खड्गोरामभद्रः॥हेहस्तदक्षिणमृतस्यशिशोर्द्विजस्य
जीवातवेविसृजशूद्रमुनौकृपाणं॥रामस्यगात्रम
सिदुर्वहगर्भखिन्नसीताप्रवासनपटोःकरुणाकुत
स्ते॥२॥कथमपिकृतंप्रहृत्य॥कृतंरामसदृशंक
र्म।अपिजीवेत्सब्राह्मणपुत्रः॥प्रविश्य॥दिव्यपुरु
षः।जयतुजयतुदेवः।दत्ताभयेत्वयियमादपिद
ण्डधारेसञ्जीवितःशिशुरयंममचेयमृद्धिः॥शम्बू
कःशूद्रमुनिःशिरसाचरणौनतस्तेसत्सङ्गजानिनिधना

न्यपितारयन्ति॥८॥रामः।इयमपिप्रियंनः तदनुभूय(
नामुग्रतपसःफलं॥यत्रानन्दाश्चमोदाश्चयत्रपुण्या
श्चसम्पदः।वैराजानामतेलोकास्तैजसाःसन्तुतेशि
वाः॥९॥शम्बूकः।युष्मत्प्रसादनोपायएषमहिमा(
किमत्रतपसःफलंअथवामहदुपकृतंतपसा।अ
न्वेष्टव्योयदसिभुवनेलोकनाथैःशरण्यो मामन्वि(
ष्यन्निहवृषलकंयोजनानांशतानि॥क्रान्त्वा प्रा
प्तःसइहतपसांसम्प्रसादोऽन्यथाचेत्क्वायोध्यायाः
पुनरुपगमोदण्डकायांवनेवः॥रामः।किन्नामद(
ण्डकेयं॥सर्वतोऽवलोक्य।आःकथं॥स्निग्धश्यामाः
माःक्वचिदपरतोभीषणाभोगरूक्षाःस्थानेस्थाने(
मुखरककुभोझाङ्कृतैर्निर्झराणां॥एतेतीर्थाश्रम
गिरिसरिद्गर्तकान्तारमिश्राःसंदृश्यन्तेपरिचितभु(
वोदण्डकारण्यभागाः॥१०॥दण्डकैवेयमत्रकिलनि
वसतादेवेन।चतुर्दशसहस्राणिचतुर्दशचराक्षस
ः॥त्रयश्चदूषणखरत्रिमूर्धानोनिपातिताः॥११॥येन
सिद्धेत्रैजनस्थानेमादृशानामपिभीरुजनपदाना
मकुतोभयःसञ्चारोजातः।रामः।नकेवलंदण्डके
यंकिन्तुजनस्थानमपि।शम्बूकः।बाढम्।एतानिखलु(
सर्वभूतलोमहर्षणान्युन्मत्तचण्डश्वापदकुलसङ्कु

नगिरिगहनगिजनरम्यानम्यन्तानिदीर्घारण्यानि
द्रविणं विमलमित्रनिलो लघ्याहि । नि कूलनिभिता: ।
कन्नितुकोविदपिशोल्लुडक्तलकना: श्लोक्ष्यापुनगामी
नवोरस्तुनगम्भालनदीमालनबः ॥ सीमान: मस्रोद
रेखुन्निलरलक्लन्गाम्सरीमालपंतरम्याद्रि: अलिस्कं
धैरवनवार्लोक्तनबः वीयते ॥ १ ॥ शमः । पश्यामि वजा
नव्यानां हृनसूर्लेदरालयं ॥ भ्रलदमिव हन्तालान
हूलिनकुम्भानिवा ॥ २ ॥ लर्घतो ज्वलो वय ॥ अभिमारामा
हिलवीलावेदैस्याहीता प्लतानिता नि नाम कान्ता ।
दाशिाकिसल: पदंलव्याक्रस्य ॥ सारं ॥ त्वयासह
विनदन्नामिवने कुसुमयुगम्बिक्षु: ॥ इति वारमत्ता बा ।
लोलोहलरव्या: ललताहस: ॥ ३ ॥ न किञ्चिदपि क्रुद्धी
ग: सौरोड़ै: रवान्पोहति ॥ नलस्य किमपि द्रव्यपो
हित्यस्य भिवोगनः ॥ रत्नाद्रन्दलवैभिर्ङ्शसदैः ॥ अ
क्षितानिमदलन्मयूरकण्ठकोमलछविभिरवकी
र्णानि पर्णैर्विरलानि विरलनीलवहलछायानरूण
नलखण्डमण्डितलान्यसंख्यानाविनिधमृगयूथानि ।
पश्यतु महाद्रुमाण: अन्नानामनीराणिमध्यमारण्य
कानि । इह मगदुकुन्ताकानलवानीरवीरुतसब
नुरनिशातस्यच्छतोयावदातानि । फलभरपरिणा

मश्यामजम्बूनिकुञ्जस्खलनमुखरभूरिस्रोतसोनिर्झ
रिण्यः॥१॥दधतिकुहरभाजामत्रभल्लूकयूनामनुरसि
तगुरूणिस्त्यानमम्बूकृतानि॥शिशिरकटुकषायः
स्त्यायतेशल्लकीनामिभदलितविकीर्णग्रन्थिनिस्य
न्दगन्धः॥२॥रामः॥भवाप्यसम्भं॥शिवास्तेपन्था॥
नोदेवयानंप्रतिपद्यस्वपुण्येभ्योलोकेभ्यः॥शम्बूकः॥या
वत्पुराणब्रह्मवादिनमगस्त्यमृषिमभिवाद्यशाश्व
तंपदमनुप्रविशामि॥इतिनिष्क्रान्तः॥रामः॥एतत
देवहिवनंपुनरद्यदृष्टंयस्मिन्नभूमचिरमेवपुरावस
न्तः॥आरण्यकाश्चगृहिणश्चरताःस्वधर्मेसांसा
रिकेषुचसुखेषुवयंरसज्ञाः॥४॥अपिच॥एतेतएव
गिरयोविरुवन्मयूरास्तान्येवमत्तहरिणानिवनस्थ
लानि॥आमञ्जुवञ्जुललतानिचतान्यमूनिनीर
न्ध्रनीलनिचुलानिसरित्तटानि॥१॥मेघमालेवयश्चा
यमारादपिविभाव्यते॥गिरिःप्रस्रवणःसोऽयंयत्र
गोदावरीनदी॥२॥अस्यैवासीन्महतिशिखरेगृध्र
राजस्यवासस्तस्याधस्ताद्वयमपिरतास्तेषुपर्णोटजे
षु॥गोदावर्य्याःपयसिविततश्यामलानोकहश्री
रन्तःकूजन्मुखरशकुनोयत्ररम्योवनान्तः॥३॥
॥तदत्रैवसापञ्चवटीयत्रचिरनिवासेनविविधं

विस्लम्भातिप्रसङ्गात् इतः प्रदेशाः प्रियायाः प्रिय
मसीं च वासन्तीं नाम वनदेवतां प्रतिवसन्ति । तत् कि
मिदमापतितमद्य रामस्य ॥ सम्प्रति हि ॥ चिरोद्वेगार
म्भी प्रसृत इव तीव्रो विषरसः कुतश्चित्संवेगात्प्रचलि
त इव शल्यस्य शकलः ॥ व्रणो रूढग्रन्थिः स्फुटित
इव हृन्मर्मणि पुनर्घनीभूतः शोको विकलयति
मां मूर्छयति च ॥ ४ ॥ तथापि तान् पूर्वसुहृदो भूमि
भागान् पश्यामि ॥ निरूप्य ॥ अहो अनवस्थितो भू
मिसन्निवेशः ॥ पुरा यत्र स्रोतः पुलिनमधुना तत्र स
रितां विपर्यासं यातो घनविरलभावः क्षितिरुहां ॥
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं निवेशः शै
लानां तदिदमिति बुद्धिं द्रढयति ॥ ५ ॥ हन्त परिहर
न्तमपि मामितः पञ्चवटीप्रदेशो बलादाकर्षतीव
॥ सकरुणं ॥ अस्यामेव दिवसास्तया सह मयातीताः
यथा स्वे गृहे तत्तत्कथाभिर्वसन्तं दीर्घं निरा
स्थायते ॥ एकः सम्प्रति नाशितप्रियतमस्तामद्य
रामः कथं पापः पञ्चवटीं विलोकयतु वा गच्छत्वसं
भाव्य नो ॥ ६ ॥ प्रविश्य शम्बूकः ॥ जयति देवः । देव भग
वानगस्त्यो मत्तः श्रुतसन्निधानस्त्वामाह । परिक
ल्पितविमानावतरणमङ्गला प्रतीक्षते वत्सला लो

पाप्मानंमेचागस्त्यायतनात्तदेहिसम्भावयास्मान्॥
अथप्रजविनापुष्पकेणस्वदेशमुपगम्याश्वमेधाय
सज्जोभविष्यसीति।रामः।यथाज्ञापयतिभगवान्।
शम्बूकः।इतस्तर्हिदेवःप्रवर्तयतुपुष्पकं।रामः।भगव
न्नितःपञ्चवटीगुरुजनोपरोधात्क्षणमप्यनतिक्र
मणीयास्य।शम्बूकः।देवपश्यपश्य।कूजत्कुञ्जकुटीर
कौशिकघटाघुत्कारवत्कीचकस्तम्बाडम्बरमूकमौ
कुलिकुलःक्रौञ्चावतोऽयंगिरिः।एतस्मिन्प्रचला
किनांप्रचलतामुद्वेजिताःकूजितैरुद्वेल्लन्तिपुरा
णरोहिणतरुस्कन्धेषुकुम्भीनसाः॥१॥अपिच।ए
तेतेकुहरेषुगद्गदनदद्गोदावरीवारयोमेघालम्बि
तमौलिनीलशिखराःक्षोणीभृतोदक्षिणाः॥अ
न्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलैरु
त्तालास्तइमेगभीरपयसःपुण्याःसरित्सङ्गमाः॥१॥
॥इतिनिष्क्रान्ताःसर्वे॥द्वितीयोऽङ्कः॥ॐ॥ॐ॥ॐ॥

॥अथ तृतीयोऽङ्कः॥

॥ततः प्रविशति नदीद्वयं तमसा मुरला च ॥ तमसा ।
सखि मुरले किमसि संभ्रान्तेव मुरला। भगवति त
मसे प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्र
या सरिद्वरां गोदावरीमभिधातुं जानास्येव यथा वधू
त्यागात्प्रभृति ॥ अनिर्भिन्नगभीरत्वादन्तर्गूढघन
व्यथः ॥ पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥१॥
तेन च तथाविधेष्टजनकष्टविनिपातजन्मना प्रक
र्षगतेन दीर्घशोकसंतापेन संप्रत्यतितरां परिक्षी
णो रामभद्रः तमवलोक्य कम्पितमिव मे हृदयं अ
धुना च प्रतिनिवर्तमानेन रामभद्रेण नियतमेव ।
पञ्चवटीवने वधूसहनिवासविस्रम्भसाक्षिणः
प्रदेशा द्रष्टव्याः तेषु च निसर्गधीरस्याप्येवंविधाया
मवस्थायामतिगम्भीराभोगशोकक्षोभसंवेगात्
पदे पदे महान्ति प्रमादस्थानानि शङ्कनीयानि त
द्भगवति गोदावरि तत्र त्वया सावधानया ।
भवितव्यं। वीचीवातैः शीकरक्षोदशीतैराकर्ष
द्भिः पद्मकिञ्जल्कगन्धान्॥ मोहे मोहे रामभद्रस्य ।
जीवं स्वैरं स्वैरं प्रेरितैस्तर्पयेति॥ तमसा। उचितमेवदा

दस्तिएवंस्नेहस्यसञ्जीवनोपायस्तुमौलिकएवरा
मभद्रस्यात्रसन्निहितः।मुर।कथमिव।तम।श्रूय
तांपुराकिलवाल्मीकितपोवनोपकण्ठात्परि
त्यज्यगतेलक्ष्मणेसीतादेवीप्राप्तप्रसववेदनात्मा
नमतिदुःखसंवेगाद्गङ्गाप्रवाहेनिक्षिप्तवती।तदैव
तत्रदारकद्वयंप्रसूताभगवतीभ्यांपृथ्वीभागीर
थीभ्यामभ्युपपन्नारसातलञ्चनीता।स्तन्यत्यागा
त्परेणचसुतद्वयंतस्याःप्राचेतसस्यमहर्षेर्गङ्गा
देवीस्वयमर्पितवती।मुर।ईदृशानांविपाकोऽपि
जायतेपावनाद्भुतः।यत्रोपकरणीभावमायात्ये
वंविधोजनः॥१॥तम।इदानीन्तुशम्बूकवधवृत्ता
न्तेनानेनसम्भावितजनस्थानगमनंरामभद्रंसर
यूमुखादुपश्रुत्यभागीरथीयदेवभगवत्यालोपा
मुद्रयास्नेहादाशङ्कितंतदेवाशङ्क्यसीतासमेता
केनचिदेवगृहाचारव्यपदेशेनगोदावरींविलोक
यितुमागता।मुर।सुविचिन्तितंभगवत्याराजधा
नीस्थितस्यखलुतैस्तैर्जगतामभ्युदयिकैःकार्यै
र्व्यापृतस्यरामभद्रस्यनियताश्चित्तविक्षेपाः।अस्य
पुनरस्यशोकमात्रद्वितीयस्यपञ्चवटीप्रवे
शोमहाननर्थइतितत्कथमिदानींसीतादेव्यारामभ

मादः॥ततःप्रविशतिपुष्पावचयव्यग्रहस्तासकरु
णौत्सुक्यमाकर्णयन्तीसीता।सीता।अम्हहेजाणामि
पिअसहीमेवासन्तीवाहरदि(१)नेपथ्ये॥सीतादे
व्याःस्वकरकलितैःशल्लकीपल्लवाग्रैरग्रेलोलःक
रिकरिकरभकोयःपुरापोषितोऽभूत्॥सीता।किं
तस्स॥पुनर्नेपथ्ये॥वध्वासार्द्धंपयसिविहरन्सोऽय
मन्येनदेर्पाद्धामेनद्विरदपतिनासन्निपत्याभियुक्तः॥
॥सीता॥ससंभ्रमंकतिचित्पदानिदधती॥अज्ज
उत्तपरित्ताहिपरित्ताहिममतंपुत्तअंदिविचिन्त्स।हद्धी
हद्धीताइंजेव्विरपरिचिदाइंअक्खराइंपञ्चवटीदंस
णेणमंमन्दभाइणीअणुबन्धन्तिहाअज्जउत्त॥इति
मूर्च्छति॥(२)प्रविश्यतमसा॥वत्सेसमाश्वसिहि।
समाश्वसिहि।नेपथ्ये।अयिविमानराजअत्रैवस्थी
यतां।सीता।ससाध्वसोत्कम्पोल्लासं॥अम्महे।

---

(१) आश्चर्य्यंजानामिप्रियसखीमेवासन्तीव्या
हरति।(२) आर्य्यपुत्रपरित्रायस्व परित्रायस्व
ममतंपुत्रकंविचिन्त्य।हाधिक्हाधिक्तान्ये
वचिरपरिचितान्यक्षराणिपञ्चवटीदर्शनेन।
मांमन्दभागिनीमनुबध्नन्तिहाआर्य्यपुत्र। ।

[illegible] विपजगायतिं

[illegible] जन:।।२।।सीना

[illegible] २ (१) समं [illegible]

[illegible] गमनड:।।सीना

[illegible] विपद्मागरं [illegible]

[illegible] गमः

[illegible] पत्नवानं निधी

[illegible] ।मानसजीवितमन.

[illegible] नुडरिमसिक:।।१

[illegible] परिय:प्र।

[illegible] नाति।२

[illegible] गतेक्

[illegible] नुवत्सत

[illegible] जीवपजी

[illegible] जगणति।।२

मडुघलेणआआरेणअअंसोम्मगम्भीरगुभावम
तपव्वभिआणिओअज्जउत्तोज्जेवतामंधारेहि(१)
इतिसममामा[illegible]मूर्छतिनम।धारयन्ती।व
त्ससमाश्वसिहिसमाश्वसिहि।नेपथ्ये।अनेनपञ्च
वटीदर्शनेन।अन्तलीनस्यदुःखाग्नेरुद्घोहाममंज्व
लितः।।वस्लीहवधूमस्यमोहःमागाहणतिमं।
एतनम।।स्वगतं।।इदंनसारोद्धूलंगुरुजनेनापिासी।(
ता।।समाश्वस्य।।हाकथंएदं।पुनर्नेपथ्ये।।हादेविद
एडकारण्यवासप्रियसखिहादेवि विदेहराजपुत्रि
।।इतिमूर्छति।।सीता।हद्वीहद्वीमंमन्दभाइणिं
उद्दिसिअअमालन्तणेत्तणीलुप्पलोमुच्छिदोज्जे
वहा।हाकधंधरणीवट्टेणिरूस्सासणीसहंविप
ल्हत्थो।अअवदिनमसेपरित्ताअहिपरित्ताअहि(
जीवावेहिजीवावेहिअज्जउत्तं।।इतिपादयोःपत
ति।।(२)

राजधर्मःखलुसराजा।(१)हाकथंसभातवन्दमण्ड(
लापाण्डुरपरिक्षामदुर्बलेनाकारेणाय्यंसोम्यगम्भी
रानुभावमानमत्वभिज्ञातव्यार्थपुत्रएवतस्मात्मांधा
रय(२)हाधिक्हाधिक्मांमन्दभागिनीमुद्दिश्यआमी
लन्नेत्रनीलोत्पलोमूर्च्छितएव।हाहाकथंधरणीपृष्ठे

जलभरिदमेहत्थणिदगम्भीरमंसलो कुदो णु एस
भारदीणिग्घोसो भरन्तकण्णविवरं मं पि मन्दभाइ
णीं झत्ति ऊसुआवेदि (१) नम्र॥ अम्महे हस्से॥ किमव्य
क्तेऽपि निनदे कुतः स्नेहमीतिरीदृशी॥ स्तनयित्नोर्म
यूरीव चकितोत्कण्ठिता स्थिता॥१॥ सीता। भअ
वदि किं भणासि अपरिप्फुटत्ति मए उण सरसञ्जो
एण पच्चभिञ्जाणिदं अज्जउत्तो ज्जेव वाहरदि (२)
नम्र॥ श्रूयते तपस्यतः शूद्रस्य दण्डधारणार्थमैक्ष्वा
को राजा जनस्थानमागत इति। सीता। दिट्ठिआ अ
परिहीणरायधम्मो क्खु सो राआ (३) नेपथ्ये॥
यत्र द्रुमा अपि मृगा अपि बन्धवो मे यानि प्रियास
हचरश्चिरमध्यवात्सं॥ एतानि तानि बहुनिर्झरक
न्दराणि गोदावरीपरिसरस्य गिरेस्तटानि॥२॥ सी
ता। हा कथं प्रभातचन्द्रमण्डलापाण्डुरपरि क्खा

(१) जलभृन्मेघस्तनितगम्भीरमांसलः कुतो नु एष
भारतीनिर्घोषो भ्रियमाणकर्णविवरां मामपि मन्द
भाग्यां झटित्युत्सुकयति। (२) भगवति किं भण।
सि अपरिस्फुटमिति मया पुनः स्वरसंयोगेन प्रत्यभि
ज्ञातं आर्यपुत्र एव व्याहरति। (३) दिष्ट्या अपरिहीन

पपन्नोऽस्मि।सीता।हद्धीहद्धीकिन्तिमं अज्जउत्तोमणि
स्सदि(१)रामः।नवतुपश्यामि।सीता।नक्खु वदित।
मभेम्मोसरह्मजइदावमंपेक्खिस्सदित्तदोअण्णभणु
ण्णादसंणिधाणेणाअहिअंपिममहाराआकुप्पि।
स्सदि(२)राम।अयिवत्सेभागीरथीवरप्रसादादनदे
वतानामप्यसंहरणासंहरामि।सीता।ओंअस्थिएदं
(३)राम॥प्रियेजानकिननुप्रियेजानकि।सीता॥स।
मन्युगद्गदं॥अज्जउत्तअसरिसंखुएदंइमस्स वुत्तन्त
स्स॥सास्रं॥अहवाकिंनिवज्जमइंजम्मन्तरेसुपिपुणो
असम्भाविददुल्लहदंसणं मंजेव्वमन्दभाइणीमुद्दिसि
अवच्छलस्सएवंवादिणोअज्जउत्तस्सउअरिकथं।

मेइदानीवक्तरं।(१)किमितिमामार्य्यपुत्रोमार्गयिष्य।
ति(२)भगवतितमसेअपसरावःयदितावत्मांमेक्षिष्य।
तितोऽनन्यनुज्ञातसन्निधानेनाधिकमपिममहारा
जाकुपिष्यति(३)ओंअस्त्येतत्।(४)आर्य्यपुत्रअसदृ
शंखल्वेतदेतस्यवृत्तान्तस्य।अथवाकिमितिवज्रमयीम
जन्मान्तरेष्वपिपुनरसम्भावितदुर्लभदर्शनांमामेवमन्द
भागिनीमुद्दिश्यवत्सलस्यैवंवादिनआर्य्यपुत्रस्योपरिक
थंनिरनुक्रोशाभविष्यामिअहमेतस्यहृदयंजानामि

तस्मात्त्वमेवनमनुकल्याणि सञ्जीवय नगात्पाति॥वि
यस्पर्शोऽपि पाणिस्तवैव निरतो जनः॥१॥सीता॥जं भ
भोदी भणादि (५) ससंभ्रमं निष्क्र
न्ता॥ततः प्रविशति भूमौ निपतितः सास्रया सीतया
स्पृश्यमानः सानन्दोच्छ्वासो रामः॥सीता॥किं
चि समस्ससिदं विअ जाणे पुणो वि पज्जाअदं विअ जी
विदं तेलोक्कस्स (२) रामः॥हन्त भोः किमेतत्।
आश्च्योतनं नु हरिचन्दनपल्लवानां निष्पीडितेन्दुक
रकन्दलजो नु सेकः॥आतप्तजीवितमनःपरितर्पणो मे
सञ्जीवनौषधिरसो नु हृदि प्रसिक्तः॥१॥स्पर्शः पु
रा परिचितो नियतं स एव सञ्जीवनश्च मनसः परि
मोहनश्च॥संतापजां सपदि यः प्रतिहत्य मूर्छामा
नन्देन जडतां पुनरातनोति॥२॥सीता॥ससा॥अमो
लक्ष्यगुमस्स्य॥एत्तिकं ज्जेव्व दाणिं वकदुं (३)
रामः॥उपविश्य॥न खलु वत्सलया सीतादेव्याभ्यु

निरुच्छ्वासनिस्पन्दं विपर्यस्तः॥भगवति तमसे परि
त्रायस्व परित्रायस्व जीवय जीवयार्यपुत्रं (१) भअव
ग्गुनमवतु पध्यानगपत्नीलगाति (२) जाने पुनरपि पर
स्यागतमिव जीवितं त्रैलोक्यनाथस्य (३) एतावदेव

राम:।अथवाकुत:प्रियतमानूनंसङ्कल्पाभ्यास
पाटवोत्पादितएषरामभद्रस्यभ्रम:।नेपथ्ये।।प्रमा
द:प्रमाद:।।सीता देव्या:स्वकरकलितैरित्यर्द्धपठते
।राम:।।सकरुणौत्सुक्यं।।किंतस्य।।पुनर्नेपथ्ये।।व
ध्वासार्द्धमिवुत्तराध्वंपगते।सीता।कोदाणिंअहिउ
ज्जिस्सदि(१)राम:।क्वासौक्वासौऽरण्यायः प्रियाया:
पुत्रकंवधूद्वितीयमभिभवति।।इत्युत्तिष्ठति।।प्रवि
श्यसंभ्रान्ता वासन्ती।।कथंदेवोरघुनन्दन:।सीता।
कधंपिअसहीमेवासन्दी(२)वासन्तिका।जयति
जयतिदेव:।राम:।।निरूप्य।।कथन्देव्या:प्रियस
खीवासन्ती।वासंदिवलक्ष्यंतांलक्ष्यंतां।इ मौजटायु
गिरिशिखरस्यहस्तदक्षिणेनसीतातीर्थेनगोदावरी
मवतीर्य्यसम्भावयतुदेव्या:पुत्रकंदेव:।सीता।हाता
दजटाओसुण्णंतए विणाजणट्ठाणं(३)राम:।अहह
हृदयमर्म्मछिद:खल्वमीकथोद्घाता:।वासं।इतइ
तोदेव:।सीता।भअवदिसच्चकंज्जेववणदेवदा वि

लि
प्पितोऽपिवक्कमतोमेजन्मसाम:।(१) कइदानींअभि
योक्ष्यते(२)कथंप्रियसखीमेवासन्ती(३)हाताततजटाये
शून्यंतया विनाजनस्थानं(४)सत्यंवनदेवतापिमांपे

लिहयखंधो सा न विसंजहंत दस सहिन्ना यं जाना भिग्ग

हिणमो सिद्धू कम्म: ॥ सर्वेनो विलोक्य सनिर्वेदं ॥ दान

ग्विन्न। सी ता। अ ऋच हित ग सेत दारि ष्कारणपरित्या

गो विरदस्स य हिया एवं विधेया दं स्मणोए कीदिसो वि

अमे हिस्त्र स्वाए सुवन्नो निरा स्मरणा भिरा स्माणमि

तम। जाना मिवलोजाना मि। तद स्संतेरस्यादपि

करुणं विनिमिन्ना कियोगे दीर्घेऽस्मिन् कटिति घटनो

लम्बित मिव। अस्त नं सो जन्याद पितु करुणो गौट करु

णं कवी स्तं भेत्ता तव हृदयं अस्मिन् लगाइव ॥ राम

: ॥ देवि। प्रसादस्व पूर्वो भेस्वर्गो स्फोतार्द्रे शीतलः ॥ स्म

आये लाईमति सांप्रतं पुनः दासिन्ति ॥ सीता ॥

ग देक्तु हेस्सगा य दंसिद सिग्गो हसंसार स्माणं दसि

स्सं दिग्गो ... ना णाणो पच्चणणा

... कारणापडि सात्ता सिलिगो विदक्रमदो मे न ...

(१)

म मा पेम्म वृति भगवति तहसेन्तदा निष्कारणपरि

त्यागिनो ऽस्मै नम्ऐवं विधेन द्रष्टेन कीदृशा इव हृद

यानुबन्धः भति ज्ञाना मि ... हलेत्तुतेस्सगा यदंसि

न ये ह्मभाग: स्मानन्दनिष्पन्दिन: सुतामपास्मि

पुत्र स्मो ला पाये सामत्थेन निक्कारणपरित्यागस्सि ।

वाएत्तिकेत्तकालेनकीदिसाविअहोन्ति (१) तम।
याह्शोऽयंताह्शौतावपि। सीता। ईदिसीअहंमन्दभौ
एणाकेवलंणिरन्तरंअज्जउत्तविरहोपुत्तविरहोवि
(२) तम। नवितव्यतेयमीहशी। सीता। किंवामए।
पसूदाएजेणतादिसंपिममपुत्तकाणंईसिविरलके
ामलधवलदसणुज्जलकपोलंअणुवद्धमुद्धका
अलीविहसिदंणिवद्धकाकसिहण्डअंअमलमुह
पुण्डरीअजुअलंणपरिचुम्बिअंअज्जउत्तेण (३)
तम। अस्तुदेवताप्रसादात्। सीता। नअवदितम
सेएदिणाअवच्चसंभुमरणेणउस्ससिदपसुदस्यणी

(१) भगवतितमसेअयंतावदीहशास्तौपुनर्नजाना
मिकुशलवावेतावताकालेनकीहशाविवभवतः
(२) ईहशीअहंमन्दभागिनीयस्यानकेवलंनिरन्त
रमार्य्यपुत्रविरहः पुत्रविरहोऽपि। (३) किम्वाम(
यामसूतयायेनताहशामपिममपुत्रयोरीषद्विरल
कोमलधवलदशनोज्ज्वलकपोलमनुवद्धमुग्धकाक
लीविहसितंनिवद्धकाकशिखण्डकममलमुखपु
ण्डरीकयुगलंनपरिचुम्बितमार्य्यपुत्रेण। (४) भगव

मंगणपेक्खदि (४) नम। अयि वत्से सर्व्वदेवताभ्यः श
ह्येमाऽस्य्यै मन्दाकिनी देव्याः तत्किमा त्वरा कूकसे।। सीता
। तदो अणुसरह्स।। इति परिक्रामतः।। (५) रामः। भग
वति गोदावरि नमस्ते। वासं देवदेवमोदस्स विजये
ना वधू किती येन देव्याः पुत्रकेण। रामः। विजयतां।
आयुष्मन्। सीता। अत्त हेई दिसो ए संवुत्तो (६) रा
मः। भतादेवि दिस्सावर्ध्धसे। येनोऽभ्युदिपकिसलय
स्निग्धदन्तांकुरेण व्याकृष्टस्ते सुतनु लवलीपल्लवः क
र्णपूरात्।। सोऽयं पुत्रस्तव मदमुचां वारणानां विजेता
यत्कल्याणं वयसि तरुणो भाजनं तस्य जातः।। ६।। सी
ता। अविउत्तो दाणीं अअं दीहाऊ इमाए सोम्मदंस
णाए सम्मोडु (७) रामः। सखि वासन्ति पश्य पश्य
त्तानुवृत्तिचातुर्यमप्यनुशिक्षितं वत्सेन। लीलोत्ख
।तमृणालकाण्डकवलच्छेदेषु सम्पादिताः पुष्यत्पुष्क
रवासितस्य पयसो गण्डूषसंक्रान्तयः।। सेकः शीकरि
णा करेण विहितः कामं विरामे पुनर्यत्स्नेहादनरा
लनालनलिनीपत्रातपत्रं कृतं।। ७।। सीता। भअवदि
तमसे अअं दाव ईदिसो दे उणणाचा वाणा मिकुमल।

तो (८) ततोऽनुसरतः (८) आश्चर्यमीदृशमपसम्प्रन्तः (९)
अवित्तकरदानी गर्भदीर्धपुरनवा सोम्यदर्शनपायसंमकं

वाएत्तिकेनकालेनकीदिसाविअहोन्ति(१) तम।
माहओऽयंताहशोतावपि।सीता।ईदिसीअहंमन्दभ्भौ
एणाकेवलंणिरन्तरंअज्जउत्तविरहोपुत्तविरहोवि
(२) तम।नवितव्यतेयमीहशी।सीता।किंवामए।
पसूदाएजेणतादिसंपिममपुत्तकाणंईसिविरलके
।मलधवलदसणुज्जलकपोलंअणुवद्धमुद्धका
अलीविहसिदंणिवद्धकाकसिहण्डअंअमलमुह
पुण्डरीअजुअलंणपरिचुम्बिअंअज्जउत्तेण(३)
तम।भसुदेवताप्रसादात्।सीता।नअवदितम।
सेरदिशा भवञ्चसंमुमरणेणउस्सासिदपणुदस्यणी

(१) भगवतितमसेअयंतावदीहशस्तोपुनर्नभामा
मिकुशलवावेतावताकालेनकीहशाविवनवतः
(२) ईहशीअहंमन्दभागिनीयस्यानकेवलंनिरन्त
रमार्य्यपुत्रविरहः पुत्रविरहोऽपि।(३) किम्वाम(
माम सूतयायेनताहशमपिममपुत्रयोरीषद्विरल
कोमलधवलदशनोज्ज्वलकपोलमनुवद्धमुग्धकाक
लीविहसितंनिवद्धकाकशिखण्डकममलमुखपु
ण्डरीकयुगलंनपरिचुम्बितमार्य्यपुत्रेण।(४) भगव

तारुंण्ये पितृयोः सहितमाराणे खणमन्नं सारितमिसं
वृत्ता(५)तल।किमन्योन्यते।भसवः खलु मकर्षपर्यं
न्तः स्नेहस्य परमं चैतदन्योन्यसंश्लेषणं पित्रोः अन्त
:करणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात्॥ आनन्दग्र
न्थिरेकोऽयमपत्यमिति बध्यते॥ १॥ वासंइतोऽपि
देवः पश्यतु। अनन्तरणमदनाण्डवोत्सवान्ते प्रथम
चिरोषितमुग्धलीलवर्हः॥ मणिमुकुटइवोच्छ्रितः
कदम्बे नदति स एष वधूसखः शिखण्डी॥ २॥ सीता॥
सकौतुकास्तं॥ रामो सो एसो सो (५) रामः॥ वत्समोद
स्व। सीता। एवं णेदं। रामः। अभिमुक्तपुटान्तर्गण
लानन्तवर्तुं प्रचलितचतुरभूताण्डवे मण्डपस्यां
करकिसलयतालैर्मुग्धया नर्त्यमानं सुतमिवमन
सात्वांवत्सलेन स्मरामि॥ ३॥ हन्त तिर्यञ्चोऽपि परि
चयमनुरुध्यन्ते। कतिपयकुसुमोद्गमः कदम्बः प्रि
यतमया परिवर्धितो यआसीत्। सीता॥ निरूप्य सा
स्त्रं॥ सुष्ठु पच्चभिज्ञाणिदं अज्जउत्तेण (५) रामः॥ स्म

तिनमभेणतेनापत्यसंस्मरणेण उत्सुमिन सुतम(
नीतयोश्च पितुः सन्निपानेन क्षणमात्रं संसारिण(
स्मिसा सूता (५) एयम: एयम: (५) सुप्पुमत्तमिश्रात्मा

रमिगिरिमयूरएषदेव्याःस्वजनइवात्रयतःप्रमोदमे
ति॥१॥वासं।अत्रतावदासनपरियहंकरोतुदेवः।एत
त देवकदलीवनमध्यवर्त्तिकान्तासखस्यशयनी
यशिलातलन्ते॥अत्रस्थितात्त्वणमदाहक्षणोयः
देव्याःसीतातत्तोहरिणकैर्नीविमुच्यतेस्म।१रामः।
इदंतावदशक्यमेवद्रष्टुम्इत्यन्यतोरुदन्नुपाविश
ति॥सीता।सहिवासंदिकिंतएकदंअज्जउत्तस्समम
चएदंदंसम्पत्तीएं।हद्धीहद्धीसोज्जेवचअज्जउत्तोतंज्जे
वपञ्चवटीवणंसाज्जेवपञ्चवटीसाज्जेववासन्दीतेज्जे
वविविहविस्सम्भसाक्खिणोगोदावरीकाणणुद्देसा
तेज्जेवजादणिव्विसेसामच्चपक्खिपादवासाज्जेवचा
हंमन्दभाइणीएदीसन्तंपिसव्वज्जेवएदंणवि
तिनाईदिसोजीवलोअस्सपरिवत्तो (१) वासं।सखे

...पुत्रेण।(१)सखिवासन्तिकिंत्वयाकृतंआर्य्यपुत्र
...निर्दयस्या।हाधिक्हाधिक्सएवार्य्यपुत्रःत
देवपञ्चवटीवनंसैववासन्तीतएवविविधविस्रम
साक्षिणोगोदावरीकाननोद्देशास्तएवजातनिर्विशे
षाःमृगपक्षिपादपाःसाचैवाहंममपुनर्मन्दभाग्याया
दृश्यमानमपिसर्वमेवैतन्नास्तीतितदीदृशोजीवलोक

खिसीति कथं न पश्यसि रामस्यावस्थां । कुवलयद
लस्निग्धैरङ्गैर्ददौ नयनोत्सवं सततमपि ते स्वेच्छाका
रूपो नवो नववपुः ॥ विकलकरणः पाण्डुः सोऽयं
शुचा परिदुर्बलः कथमपि स इत्युन्नेतव्यस्तथापि दृ
शोः प्रियः ॥१॥ सीता । पेक्खामि सहि पेक्खामि (१)
तम् । सखि पश्यन्ती प्रियं स्थाः । सीता । हा देव एण्णो म
ए विणा अहं पि एदेण विणेत्ति सिविणे वि केण सम्भा
विदं आसि ता मुहुत्तकं पि जम्मन्तरादो विअ लद्धस
दंसणा बाहसलिलन्तरेसु पेक्खामि दाव वच्छलं
अज्जउत्तं ॥ इति पश्यति ॥ (२) तमसा सस्नेहास्रं परि
ष्वज्य ॥ विलुलितमतिपूरैर्बाष्पमानन्दशोकप्रभव
मवसृजन्ती तृष्णयोत्तानदीर्घा ॥ स्नपयति हृदयेशं
स्नेहनिस्यन्दिनी ते धवलबहलमुग्धा दुग्धकुल्ये
व दृष्टिः ॥२॥ वासं । ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधु
च्युतः स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः
कलमविरलं रज्यत्कण्ठाः क्वणन्तु शकुन्तयः पुनरि
दमयं देवो रामः स्वयं वनमागतः ॥३॥

(१) प्रेक्षे सखि प्रेक्षे । (२) हा देव एतेन मया विनाऽहम
प्येतेन विनेति स्वप्नेऽपि केन सम्भावितमासीत् तन्मु
हूर्तकमपि जन्मान्तरादिव लब्धदर्शनाद्बाष्प

राम:।।एहिससिवासन्तिनन्वित:स्थीमतां।वासं।।
उपविस्ससात्वं।।महाराजअपिकुशलंकुमारल१
क्ष्मणस्य।राम:।।अश्रुतिमभिनीय।।करकमलवि
तीर्णैरम्बुनीवारशष्पैस्तरुशकुनिकुरङ्गान्मैथि
लीयानपुष्यत्।भवतिममविकारस्तेषुदृष्टेषुकोऽ
पिद्रवइवहृदयस्यप्रस्तरोद्भेदयोग्य:।।१।।वासं।।
महाराजननुपृच्छामिअपिकुशलंकुमारलक्ष्म
णस्येति।राम:।।स्वगतं।।अयेमहाराजेतिनिष्प्रण
यमामन्त्रणपदंसौमित्रिमात्रेचबाष्पस्खलितान्त
र:कुशलानुप्रश्नस्तथामन्येविदितसीतावृत्तान्त
यमिति।।प्रकाशं।।आ:कुशलंकुमारस्येतिरोदि
ति।।वासं।अयिदेवकिमितिदारुणोदारुण:ख१
ल्वसि।सीता।सहिवासन्दिकिंतुमंविएवंवादिणी
पिआरुहोक्खुसव्वस्सअज्जउत्तोविसेसदोममपि
असहीए९वासं।त्वंजीवितंत्वमसिमेहृदयंद्वि१
तीयंत्वंकौमुदीनयनयोरमृतंत्वमङ्गे।।इत्यादि१

ससिलान्तरेषुमेत्तेतावह्वत्सलमार्य्यपुत्रं।९
ससिवासन्तिकिंत्वमसिएवंवादिनीप्रियार्ह:ख१
लुसर्वस्यार्य्यपुत्रोविशेषतोममप्रियसख्या: ॥

त्रिः। प्रियवार्त्तैरस्तु रम्यमुग्धां तामेव शान्तमथवा।
किमिहोत्तरेण॥१॥ इति मूर्छति॥ रामः। स्थानेऽस्व
नुसाक्य निवर्तिमेहि स्वसखि समाश्वसिहि सम
श्वसिहि। वासं॥ समाश्वस्य॥ तत्किमिदमकार्यम
नुष्ठितं देवेन॥ सीता। सहि वासन्दि विरम (१) रामः।
लोको न मृष्यतीति। वासं। तत्कस्य हेतोः। रामः। स
एव जानाति किमपि। तमसा। चिरादुपालम्भः। वासं।
अयि कठोर यशः किल ते प्रियं किमयशो ननु घोर
मतः परं॥ किमभवद्विपिने हरिणीदृशः कथय ना
थ कथं वत मन्यसे॥२॥ सीता। तुमं ज्जेव सहि वासन्
दि दारुणा कठोरा अ जा एवं पदीवेसि (२) तमसा। प्रण
य एवाभिव्याहरति शोकश्च॥ रामः। सखि किमत्र
मन्तव्यं॥ त्रस्तैकहायनकुरङ्गविलोलदृष्टेस्तस्याः
परिस्फुरितगर्भभरालसायाः॥ ज्योत्स्नामयीव मृ
दुमुग्धमृणालकल्पा क्रव्याद्भिरङ्गलतिका निय
तं विलुप्ता॥ सीता। अज्जउत्त धरामि एसा धरामि।
(३) रामः। हा प्रिये जानकि क्वासि। सीता। हद्धी ह

(१) सखि वासन्ति विरम। (२) त्वमेव सखि दारुणा क
ठोरा च या एवं प्रदीपयसि। (३) आर्यपुत्र धरामि एषास्मि।

दीअज्जउत्तो विप्पमुक्ककण्ठं रुण्णो (१) तम। व
त्से सांप्रतिकमेवैतत्कर्त्तव्यं। निर्भरदुःखितैर्दुःखवि
क्षेपणं नियतः॥ पूरोत्पीडे तडागस्य परीवाहः प्र
तिक्रिया॥ शोकक्षोभे च हृदयं प्रलापैरेव धार्य्यते।
१॥ विशेषतो रामभद्रस्य बहुप्रकारकष्टो जीव
लोकः॥ इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा
प्रियाशोको जीवं कुसुममिव घर्म्मः क्लमयति। स्व
यं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभस्तदद्य
प्युच्छ्वासो भवति ननु लाभो हि रुदितं॥१॥ रामः।
कष्टं भोः कष्टं। दलति हृदयं गाढोद्वेगं द्विधा तु न
भिद्यते वहति विकलः कायो मोहं न मुञ्चति चेतनां
॥ ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्प्रह
